CAREERINDIA

# आदर्शप्रश्नपत्रम् – 2021-22

## प्रथमसत्रीया परीक्षा

## कक्षा – द्वादशी (XII)

## संस्कृतम् (केन्द्रिकम्) कोड सं. – (322)

**समयः – सार्धैकहोरा** **सम्पूर्णाङ्काः – 40**

| | **अनुप्रयुक्तव्याकरणम्** | |
|---|---|---|
| 1. | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं सन्धिपदं सन्धिच्छेदपदं वा प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्)**<br>(i) वेदमनूच्य **आचार्योऽन्तेवासिनम्** अनुशास्ति।<br>(क) आचार्यः + अन्तेवासिनम् (ख) आचार्योः + अन्तेवासिनम्<br>(ग) आचार्य + अन्तेवासिनम् (घ) आचार्यः + आन्तेवासिनम्<br>(ii) यदि राज्ञः **मोहम् + न** सहसे, धनुः स्पृश।<br>(क) मोहन्न (ख) मोहम् न<br>(ग) मोहो न (घ) मोहं न<br>(iii) वैवस्वतो **मनुर्नाम** मनीषिणां माननीयः।<br>(क) मनुर् + नाम (ख) मनुः + रनाम<br>(ग) मनुः + नाम (घ) मनु + नाम<br>(iv) एवमुपासितव्यम् । एवं **चैतदुपास्यम्**।<br>(क) चैत + उपास्यम् (ख) चैतद् + उपास्यम्<br>(ग) चैतदु + उपास्यम् (घ) चैतत् + उपास्यम् | 1×6=6 |

www.careerindia.com

| | | |
|---|---|---|
| | (v) दीपस्य समीपमागत्य **<u>संन्यासिनोक्तम्</u>**।<br>(क) सन्यासिनोः + उक्तम् (ख) सन्यासिः + नोक्तम्<br>(ग) संन्यासिना + उक्तम् (घ) सन्यासि + नोक्तम्<br>(vi) शुल्के विपणितं राज्यं **<u>पुत्रार्थे</u>** यदि याच्यते।<br>(क) पुत्र + आर्थे (ख) पुत्र + अर्थे<br>(ग) पु + त्रार्थे (घ) पुत्रा + आर्थे<br>(vii) **<u>दौवारिकः</u> + <u>तु</u>** तमाकृष्य नयन्नेव प्रचलितः ।<br>(क) दौवारिकस्तु (ख) दौवारिकश्तु<br>(ग) दौवारिकष्तु (घ) दौवारिको तु | |
| 2. | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नपञ्चकम्)**<br>(i) अधुनैव **<u>परिष्कृतं पारदभस्म</u>** तुभ्यं दास्यामि।<br>(क) उपपारदभस्म (ख) पारदभस्मपरिष्कृतम्<br>(ग) परिष्कृतपारदभस्मस्य (घ) परिष्कृतपारदभस्म<br>(ii) **<u>धैर्यसागरः</u>** लक्ष्मणः केन क्षोभितः ।<br>(क) धैर्येण सागरः (ख) धैर्यस्य सागरः<br>(ग) धैर्याय सागरः (घ) धैर्यात् सागरः<br>(iii) सः **<u>साक्षेपम्</u>** अवोचत्।<br>(क) आक्षेपेण समम् (ख) आक्षेपेण तुल्यम्<br>(ग) आक्षेपे सहितम् (घ) आक्षेपेण सहितम्<br>(iv) **<u>एकस्मिन् शरीरे संक्षिप्ता</u>** पृथ्वी रक्षितव्येति।<br>(क) एकशरीरासंक्षिप्ते (ख) एकशरीरसंक्षिप्तम्<br>(ग) एकशरीरसंक्षिप्ता (घ) एकशरीरेसंक्षिप्ता | 1×5=5 |

www.careerindia.com

| | | |
|---|---|---|
| | (v) **प्राप्तपरिचयपत्राः** एव प्रविशन्ति।<br>(क) प्राप्तं परिचयपत्रं येभ्यः ते (ख) प्राप्तं परिचयपत्रं यस्मात् सः<br>(ग) प्राप्तं परिचयपत्रम् येन सः (घ) प्राप्तं परिचयपत्रं यैः ते<br>(vi) यानि **अनवद्यानि** कर्माणि तानि सेवितव्यानि।<br>(क) न वद्यानि (ख) अन् अवद्यानि<br>(ग) न अवद्यानि (घ) अन् वद्यानि<br>(vii) त्यागाय **मितं भाषन्ते ये तेषाम्**।<br>(क) मितभाषिणाम् (ख) मितभाषी<br>(ग) मितभाषिणः (घ) मितभाषिणम् | |
| 3. | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्)**<br>(i) युक्ताः **आ + युज् + क्त** च यथा वर्तेरन् तथा वर्तेथाः।<br>(क) आयुज्क्ताः (ख) आयुक्तः<br>(ग) आयुक्तम् (घ) आयुक्ताः<br>(ii) **श्लाघ् + अनीयर्** काले अत्रभवतीं वारयितुं नोत्सहे।<br>(क) श्लाघनीयर् (ख) श्लाघनीये<br>(ग) श्लाघानीये (घ) श्लाघनीयस्य<br>(iii) हन्त! निवेदितम् **अप्रभुत्वम्**।<br>(क) अप्रभु + त्वम् (ख) अप्रभु + त्वल्<br>(ग) अप्रभु + त्व (घ) अप्रभु + तल्<br>(iv) **सहधर्मचारिन् + ङीप्** खल्वहम्।<br>(क) सहधर्मचारिणी (ख) सहधर्मचारिणि<br>(ग) सहधर्मचारिन् (घ) सहधर्मचारिनि | 1×6=6 |

www.careerindia.com

| | | |
|---|---|---|
| | (v) परं **संन्यास + इनि** पण्डिताः बालाश्च न किमपि प्रष्टव्याः।<br>(क) संन्यासिनि (ख) संन्यासिनी<br>(ग) संन्यासिनः (घ) संन्यासी<br>(vi) दौवारिकः तु तम् **नयन्** एव प्राचलत्।<br>(क) नी + शतृ (ख) नी अत्<br>(ग) नय् + अन् (घ) नी + अन्<br>(vii) **शुद्धि + मतुप्** तदन्वये शुद्धिमत्तरः दिलीपः प्रसूतः।<br>(क) शुद्धिमत् (ख) शुद्धिमतुप्<br>(ग) शुद्धिमन् (घ) शुद्धिमति | |
| 4. | **समुचितम् उपपदविभक्तिरूपं चिनुत– (केवलं प्रश्नत्रयम्)**<br>(i) यस्याः ……………... समं भर्ता अस्ति ।<br>(क) शक्रम् (ख) शक्रेण<br>(ग) शक्रस्य (घ) शक्राय<br>(ii) …………….. प्रियधनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः।<br>(क) आचार्यम् (ख) आचार्येण<br>(ग) आचार्याय (घ) आचार्यस्य<br>(iii) …………… न प्रमदितव्यम्।<br>(क) धर्मात् (ख) धर्मेण<br>(ग) धर्मस्य (घ) धर्मान्<br>(iv) वैवस्वतः मनुः…………… आद्यः आसीत्।<br>(क) महीक्षित् (ख) महीक्षितैः<br>(ग) महीक्षितः (घ) महीक्षिताम् | 1×3=3 |

www.careerindia.com

| | पठितावबोधनम् | |
|---|---|---|
| 5. | **भाषिककार्यम् – निर्देशानुसारम् उत्तराणि चिनुत - (केवलं प्रश्नषट्कम्)** | 1×6=6 |
| | (i) "**दुष्टः प्रियः अपि तस्य त्याज्यः आसीत्**" अत्र '**सज्जनः**' इति पदस्य किं विलोमपदं प्रयुक्तम्<br>(क) प्रियः (ख) त्याज्यः<br>(ग) तस्य (घ) दुष्टः | |
| | (ii) "**संन्यासिनः अपि कठोरैः भाषणैः तिरस्करोषि**" अत्र **विशेषणपदं** किम्?<br>(क) संन्यासिनः (ख) कठोरैः<br>(ग) भाषणैः (घ) अपि | |
| | (iii) "**प्रजानां भूत्यर्थं स ताभ्यो बलिमग्रहीत्**" अत्र '**कल्याणार्थम्**' इत्यर्थे किं पदं प्रयुक्तम्?<br>(क) भूत्यर्थम् (ख) प्रजानाम्<br>(ग) बलिम् (घ) ताभ्यो | |
| | (iv) "**केवलं महाराजशिववीरस्याज्ञां वयं शिरसा वहामः**" अत्र **क्रियापदं** किम्?<br>(क) वयम् (ख) शिरसा<br>(ग) वहामः (घ) केवलम् | |
| | (v) **सत्यं कथय कस्त्वम्?** अत्र '**कथय**' इति क्रियापदस्य **कर्तृपदं** किम्?<br>(क) सत्यम् (ख) त्वम्<br>(ग) कः (घ) कथय | |
| | (vi) **'सत्यम्। क्षान्तः अयम् अपराधः'** इत्यत्र किं विशेष्यपदम्?<br>(क) अपराधः (ख) सत्यम्<br>(ग) क्षान्तः (घ) अयम् | |
| | (vii) "**तदुत्सङ्गे भोजमात्मानं मुमोच**" अत्र '**क्रोडे**' इत्यस्य **पर्यायपदं** किम्?<br>(क) आत्मानम् (ख) भोजम्<br>(ग) मुमोच (घ) उत्सङ्गे | |

www.careerindia.com

| | | |
|---|---|---|
| 6. | **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् अर्थं चिनुत – (केवलं प्रश्नचतुष्टयम्)**<br><br>(i) वक्तारम् अपश्यता एव आकर्णि **<u>मन्द्रस्वरमेदुरा</u>** वाणी ।<br>(क) मधुरस्वरयुक्ता (ख) क्रोधपरिपूर्णा<br>(ग) गभीरस्वरपरिपूर्णा (घ) कारुण्यपूर्णा<br>(ii) यान्यस्माकं सुचरितानि तानि उपास्यानि, न **<u>इतराणि</u>**।<br>(क) अन्यानि (ख) सर्वाणि<br>(ग) अनेकानि (घ) सकलानि<br>(iii) प्रियोऽपि दुष्टः **उरगक्षता** अङ्गुली इव त्याज्यः आसीत् ।<br>(क) गरुडेन विक्षता (ख) कीटेन विक्षता<br>(ग) शत्रुणा क्षता (घ) सर्पेण दष्टा<br>(iv) अथ यदि ते **वृत्तविचिकित्सा** स्यात् ।<br>(क) धनविषये सन्देहः (ख) व्यवहारविषये सन्देहः<br>(ग) स्वास्थ्यविषये सन्देहः (घ) व्रतविषये सन्देहः<br>(v) अतः परं न मातुः **परिवादं** श्रोतुम् इच्छामि ।<br>(क) परिवारम् (ख) प्रशंसाम्<br>(ग) निन्दाम् (घ) वार्ताम् | 1×4=4 |
| | **संस्कृतसाहित्येतिहासपरिचयः** | |
| 7. | **समुचितस्य रचनायाः कवेः वा अभिधानं चिनुत - (केवलं प्रश्नत्रयम् )**<br><br>(i) "**भासः**" इत्यस्य लेखकस्य रचना का?<br>(क) रघुवंशम् (ख) योगसूत्रम्<br>(ग) प्रतिमानाटकम् (घ) भोजप्रबन्धः | 1×3=3 |



www.careerindia.com

| | | |
|---|---|---|
| | (ii) "**प्रजानुरञ्जको नृपः**" इति पाठस्य रचयिता कः?<br>(क) अश्वघोषः (ख) कालिदासः<br>(ग) भारविः (घ) विष्णु शर्मा<br>(iii) "**अम्बिकादत्तव्यासः**" इत्यस्य लेखकस्य रचना का?<br>(क) भोजप्रबन्धः (ख) प्रतापविजयः<br>(ग) महाराणाविजयः (घ) शिवराजविजयः<br>(iv) "**अनुशासनम्**" इति पाठः कस्याः उपनिषदः सङ्गृहीतः?<br>(क) तैत्तिरीयोपनिषदः (ख) केनोपनिषदः<br>(ग) कठोपनिषदः (घ) मुण्डकोपनिषदः | |
| 8. | **महाकाव्य-गद्यकाव्य-चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं चिनुत- (केवलं प्रश्नत्रयम्)**<br>(i) **आख्यायिका** कस्य भेदः भवति?<br>(क) नाट्यस्य (ख) चम्पूकाव्यस्य<br>(ग) पद्यस्य (घ) गद्यकाव्यस्य<br>(ii) **गद्यपद्यमयं** काव्यं भवति?<br>(क) गद्यकाव्यम् (ख) पद्यकाव्यम्<br>(ग) चम्पूकाव्यम् (घ) एतेषु न किमपि<br>(iii) **संस्कृतमहाकाव्ये** न्यूनातिन्यूनं .............. सर्गाः भवितव्याः -<br>(क) अष्ट (ख) नव<br>(ग) दश (घ) षड्<br>(iv) **महाकाव्यं** कस्य भेदः अस्ति?<br>(क) गद्यकाव्यस्य (ख) पद्यकाव्यस्य<br>(ग) चम्पूकाव्यस्य (घ) नाट्यकाव्यस्य | 1×3=3 |

www.careerindia.com

CAREERINDIA

| | | |
|---|---|---|
| 9. | **नाट्य-तत्त्वानां समुचितं वैशिष्ट्यं चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) **अभिनयस्य** प्राधान्यं भवति ।<br>(क) पद्यकाव्ये (ख) गद्यकाव्ये<br>(ग) नाट्ये (घ) चम्पूकाव्ये<br>(ii) संस्कृतनाटकेषु ............... **हास्योत्पादकं पात्रं** कथ्यते।<br>(क) मित्रम् (ख) सूत्रधारः<br>(ग) नृप: (घ) विदूषकः<br>(iii) नाटकानां **भाषा** ............... भवति।<br>(क) गद्यमयी (ख) पद्यमयी<br>(ग) गद्यपद्यमयी (घ) एतेषु न किमपि<br>(iv) **संस्कृतनाटकानि** प्रायः ............... भवन्ति?<br>(क) दुःखान्तानि (ख) सुखान्तानि<br>(ग) हास्यानि (घ) क्रीडान्तानि<br>(v) नाटकं कस्य एकः **प्रसिद्धभेदः** भवति ?<br>(क) रूपकस्य (ख) महाकाव्यस्य<br>(ग) गद्यकाव्यस्य (घ) चम्पूकाव्यस्य | 1×4=4 |

********************************

www.careerindia.com